|| ॐ नमो भगवते वासुदेवाय ||

# श्रीमद् भागवत रसिक कुटुंब

## महालक्ष्मी अष्टकम् (इंद्र कृत)

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

इन्द्र उवाच

नमस्तेऽस्तु महामाये, श्रीपीठे सुरपूजिते ।
शंखचक्रगदाहस्ते , महालक्ष्मि नमोऽस्तु ते ॥ 1 ॥

नमस्ते गरुडारूढे, कोलासुरभयंकरि ।
सर्वपापहरे देवि, महालक्ष्मि नमोऽस्तु ते ॥ 2 ॥

सर्वज्ञे सर्ववरदे, सर्वदुष्टभयंकरि ।
सर्वदुःखहरे देवि, महालक्ष्मि नमोऽस्तु ते ॥ 3 ॥

सिद्धिबुद्धिप्रदे देवि, भुक्तिमुक्तिप्रदायिनि।
मन्त्रपूते सदा देवि, महालक्ष्मि नमोऽस्तु ते ॥ 4 ॥

आद्यन्तरहिते देवि, आद्यशक्तिमहेश्वरि ।
योगजे योगसम्भूते, महालक्ष्मि नमोऽस्तुते ॥ 5 ॥

स्थूलसूक्ष्ममहारौद्रे, महाशक्तिमहोदरे ।
महापापहरे देवि, महालक्ष्मि नमोऽस्तु ते ॥ 6 ॥

पद्मासनस्थिते देवि, परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातर्, महालक्ष्मि नमोऽस्तु ते ॥ 7 ॥

श्वेताम्बरधरे देवि, नानालंकारभूषिते ।
जगत्स्थिते जगन्मातर्, महालक्ष्मि नमोऽस्तु ते ॥ 8 ॥

महालक्ष्म्यष्टकं स्तोत्रं, यः(फ्) पठेद्भक्तिमान्नरः।
सर्वसिद्धिमवाप्नोति, राज्यं प्राप्नोति सर्वदा ॥ 9 ॥

एककाले पठेन्नित्यं, महापापविनाशनम्।
द्विकालं यः(फ्) पठेन्नित्यं(न्), धनधान्यसमन्वितः ॥ 10 ॥

त्रिकालं यः(फ्) पठेन्नित्यं, महाशत्रुविनाशनम्।
महालक्ष्मीर्भवेन्नित्यं, प्रसन्ना वरदा शुभा ॥ 11 ॥

॥ इति इन्द्रकृतं महालक्ष्म्यष्टकं सम्पूर्णम् ॥